# पाठ-२७(अ)
# भारतस्य ज्ञानविज्ञानपरम्परा

**सारान्शः**

संप्रति सर्वस्मिन् जगति संस्कृतस्य भारतीय संस्कृतेश्च अप्रतिमं महत्त्वं सर्वैः स्वीक्रियते । यदा अन्यत्र संस्कृतेः उद्भवः अपि न जातः तदा भारते संस्कृतिः प्रगतेः पराकाष्ठां प्राप्तवती । संस्कृत-भाषायां वेदादिषु, दार्शनिकग्रन्थेषु धर्मशास्त्रादिषु च न केवलं धार्मिकं तात्त्विकं च चिन्तनम् उपलभ्यते अपितु मानवहिताय वैज्ञानिकचिन्तनमपि पदे पदे प्राप्यते। अतः भारतभूमौ प्राचीनकालतः एव ज्ञान-विज्ञान-परम्परा प्रवर्तते। गणित-ज्योतिष्-रसायन-भौतिकी-खगोलविज्ञान - आयुर्वेद - वास्तुविज्ञान कृषिविज्ञान-पर्यावरणविज्ञानादीनां प्रभूतं ज्ञानम् अस्माकं प्राचीनग्रन्थेषु सन्निहितं वर्तते।

**आवश्यकोऽयं ज्ञानम्**

- संस्कृत वाङ्मये प्रभूतं वैज्ञानिकं साहित्यं वर्तते ।
- गणितशास्त्रे आर्यभटस्य योगदानं महत्त्वपूर्णम् ।
- शून्यस्य अवधारणा, दशमा पद्धतिः दशमलव-प्रणाली, (पाइ) इत्यस्य मूल्यनिर्धारणं संख्या विज्ञानम् इत्यादीनां अन्वेषणं संस्कृतवाङ्मयस्य प्रमुखम् अवदानम् ।
- ज्योतिश्शास्त्रे भास्कराचार्यस्य सिद्धान्त शिरोमणिः प्रसिद्धः ग्रन्थः वर्तते । लीलावती अस्य एव भागः विद्यते ।
- आयुर्वेदे आचार्यचरकस्य चरकसंहिता, आचार्य-सुश्रुतस्य सुश्रुतसंहिता च महत्त्वपूर्णौ ग्रन्थौ । सुश्रुतः प्रथमः त्वक्प्रत्यारोपणविशेषज्ञः ।
- कृषिविज्ञाने पराशरस्य कृषिपराशरः कृषिविषये विश्वकोषः एव ।
- वास्तुविज्ञानस्य अष्टादशविशेषणानि मत्स्यपुराणे परिगणितानि । बृहत्संहितायां प्रासादनिर्माणकला विस्तरेण वर्णिता ।
- महर्षिभरद्वाजविरचिते यन्त्रसर्वस्वे विमानविषये महत्त्वपूर्णाः आविष्काराः प्रदत्ताः ।
- संस्कृतवाङ्मये पर्यावरणसंरक्षणस्य सिद्धान्ताः पदे पदे प्राप्यन्ते । पर्यावरणसंरक्षणाय प्रकृतिमानवयोः पारस्परिकं सन्तुलनम् अनिवार्यम्। प्रकृतिः प्रतिक्षणं मानवस्य हितसम्पादने निरता, मानवेनापि सदैव पर्यावरणस्य रक्षणं करणीयम् ।

**योग्यतां वर्धयत**

**गणितम्**

भारते गणितविज्ञानस्य प्रारम्भः वैदिककालात् एव अभवत् । वैदिक-वाङ्मये तात्कालिकेषु अन्येषु ग्रन्थेषु च गणितीयानाम् अंशानाम् उल्लेखः विशेषतः दृश्यते।

**दशमाङ्कपद्धतिः**

'दशमाङ्कपद्धतिः' तु भारतस्य एव महत्त्वपूर्ण योगदानं वर्तते। एतस्यां पद्धतौ 1–9 अंकाः शून्यं च उपयुज्यन्ते । अस्यां स्थानपरिवर्तनेन सह अङ्कानां मूल्ये परिवर्तनमपि क्रियते । एषा पद्धतिः द्विसहस्रवर्षेभ्यः पूर्वम् एव भारते प्रचलिता आसीत्।

**शून्यम्**

शून्यस्य अवधारणा अपि सर्वप्रथमं संस्कृतवाङ्मये एव प्राप्यते। पिङ्गलस्य छन्दःसूत्रे (200 ई. पू.) शून्यस्य सङ्केतः लभ्यते ।

**बौधायनसूत्रम् (पाइथागोरस-सिद्धान्तः)**

एषः नियमः पाइथगोरसात् सहस्राधिकवर्षेभ्यः पूर्वम् एव निर्मितः आसीत्। पाइथगोरसमहोदयः तस्य विस्तारं कृतवान् । अयं प्रमेयः मूलतः तु शुल्वप्रमेयः वर्तते । शुक्लयजुर्वेदस्य बौधायनशुल्वसूत्रे, कात्यायनशुल्वसूत्रे, आपस्तम्बशुल्वसूत्रे मानवशुल्वसूत्रे च एतत् सूत्रम् उपलभ्यते। बौधायनादयः मुनयः एतं नियमं प्रतिपाद्य यथायोग्यं विवरणम् अपि दत्तवन्तः । विभिन्नाकाराणां यज्ञवेदीनां निर्माणे एतस्य सिद्धान्तस्य उपयोगः क्रियते स्म ।

**'पाई' इत्यस्य मूल्यम्**

आर्य भट्टः एव 121 श्लोकात्मके 'आर्यभटीयम्' इति ग्रन्थे सर्वप्रथमं वृत्तस्य परिधिव्यासयोः अनुपातस्य (n) पाई) इत्यस्य मूल्यं निर्धारितवान् । तत् 3.1416 भवति । आधुनिकवैज्ञानिकानां मते अपि एतत् मूल्यं 3.1416926 वर्तते। आर्यभटेन एव प्रतिपादितम् यत् - "मृज्जलशिखिवायुभ्यो भूगोलः सर्वतो वृत्तः ।आर्यभटेन एव स्वग्रन्थे "पृथिवी सूर्य परितः परिभ्रमति' इत्यपि साधितम् अस्ति।

**धनऋणगुणविभागादीनां ज्ञानम्**

यजुर्वेदस्य मन्त्रेषु धन-ऋण-गुण विभागादीनां परिज्ञानमपि उपलभ्यते- एका॑ च मे ति॒स्रश्च॑ मे॒ पञ्च॑ च मे स॒प्त च॑ मे॒ नव च म एका॑दश च मे॒ त्रयो॑दश च मे॒....।

**ज्योतिषम्**

वैदिकवाङ्मये 'ज्योतिष्' इति नाम शास्त्रस्य वर्तते । असंख्याः ग्रहाः सन्ति, अन्यसौरमण्डलानि अपि भवितुम् अर्हन्ति इत्यादयः विचाराः भारतीये ज्योतिश्शास्त्रे रूढमूलाः सन्ति । ग्रहाणां स्थितिः परस्पराकर्षणं, ग्रहणस्वरूपम् इत्यादीनि अत्र विस्तरेण उक्तानि । नक्षत्रगणनायाः, ग्रहविचारणायाः कालगणनायाश्च विलक्षणा क्षमता भारतीय ज्योतिष शास्त्रेषु अस्ति।

**आयुर्वेदः**

"जीवेम शरदः शतम्" । आयुर्वेदस्य उद्देश्यम् अस्ति स्वास्थ्यरक्षणं रोगानां निवारणं च । आयुर्वेदस्य गणना चतुर्षु उपवेदेषु भवति । एषः प्रायः ऋग्वेदस्य उपवेदः मन्यते। परं केषाञ्चित् विदुषां मते एषः अथर्ववेदस्य उपवेदः । सर्वप्रथमम् अथर्ववेदे एव मानवरोगाः, पशुरोगाः तेषां प्रतिकाराश्च वर्णिताः।

**(क) चरकसंहिता-** 120 अध्यायात्मके अस्मिन् ग्रन्थे सर्वेषां विषयानां प्रतिपादनं कृतम्। अस्मिन् प्रमुखतया त्रिदोषवर्णनं कृतम् । ग्रन्थेऽस्मिन् सर्वेषां रोगाणां चिकित्सा वर्णिता ।

**(ख) सुश्रुतसंहिता-** अस्मिन् ग्रन्थे अपि 120 अध्यायाः सन्ति । अस्मिन् प्रमुखतया शल्य-क्रियायाः वर्णनं शल्य-क्रियायाः उपकरणानां परिचयः च प्राप्येते । सुश्रुतसंहितायां सर्वप्रथमं त्वक्प्रत्यारोपणस्य वर्णनं कृतम्।

**(ग) अष्टा हृदयम् -** 661 शताब्द्यां वाग्भटेन विरचिते अस्मिन् ग्रन्थे रसायनतन्त्रस्य वर्णनं विशेषरूपेण उपलभ्यते । वाग्भटस्यैव 'अष्टाङ्गसंग्रहः' अपि प्रमुखः ग्रन्थः वर्तते।

**(घ) भावप्रकाशः** षोडशशताब्द्यां भावमिश्रेण विरचिते - अस्मिन् ग्रन्थे सर्वेषाम् अङ्गानां चिकित्सायाः वर्णनं विद्यते।

**कृषिविज्ञानम्**

कृषेः महत्त्वं प्रतिपादयन् ऋग्वेदे उक्तम् – 'कृषिमित् कृषस्व' इति । अर्थात् कृषिः एव श्रेष्ठं कर्म। अतः कृषिः एव कार्या। कृषिविज्ञानक्षेत्रे चतुर्थशताब्द्यां महर्षिपराशरेण विरचितः "कृषिपराशरः " कृषिशास्त्रस्य विश्वकोषः कथयितुं शक्यते । अस्मिन् ग्रन्थे कृषिविधिः सम्यकरूपेण वर्णितः ।

**वृष्टेः मात्रायाः ज्ञानम्**

कुत्र कियती वृष्टिः भवति इति वर्णयन् महर्षि पराशरः कथयति –समुद्रे दशाभागांश्च षड्भागानपि पर्वते । पृथिव्यां चतुरो भागान् सदा वर्षति वासवः । (कृषिपराशरः, 29)

**वास्तु-विज्ञानम्**

'वास्तु' इत्यस्य अर्थः – वसन्ति प्राणिनो यत्र अथवा वसन्त्यत्र इति ।प्राचीनभारते उत्कृष्टं वास्तुविज्ञानम् आसीत् ।सिन्धुसभ्यताचित्राणि प्रायः सर्वान् आश्चर्यचकितान् कुर्वन्ति एव । तत्रत्या वास्तुविद्या अतिप्राचीना अत्युत्कृष्टा च। कर्णाटके बेलूरे विद्यमानः भूमिस्पर्शरहितः स्तम्भः, कोणार्क क्षेत्रस्य सूर्यदेवालयः, शृंगेरीस्तम्भाः, अनन्तपुरीस्थाः सप्तस्वरप्रभवाः मण्डपाधाराः स्तम्भाः, अजन्ता-एल्लोरागुहाः, देहलीस्थः लोहस्तम्भः इत्यादयः भारतीयवास्तुविद्यायाः गरिमाणं प्रमाणीकुर्वन्ति। बृहत्संहिता, अर्थशास्त्रम्, मयमतम् मयसारः, मनुष्यालयचन्द्रिका, सुप्रभेदागमः, वास्तुरत्नावली, कामिकागमः, बहवास्तुमाला इत्यादिषु अनेकेषु ग्रन्थेषु वास्तुशास्त्रं निरूपितम् अस्ति।

**विमानशास्त्रम्**

भरद्वाजमहर्षेः (500 ई.पू.) यन्त्रसर्वस्वम्, यन्त्रार्णवम्, विमानशास्त्रम्, अंशबोधिनी, अगस्त्यमुनेः शक्तिसूत्रम्, ईश्वरस्य सौदामिनीकला, भरद्वाजस्यैव अंशुभतन्त्रं, शाकटायनस्य वायु-तत्त्वप्रकरणं वैश्वमारुततन्त्रं च, नारदस्य धूमप्रकरणम् इत्यादीनां विमानशास्त्रसम्बद्धानां ग्रन्थानाम् उल्लेखः दृश्यते। भोजस्य समरा ण सूत्रधारं, शौनकमहर्षेः व्योमयानतन्त्रं, गर्गस्य यन्त्रकल्पः, नारायणस्य विमानचन्द्रिका, चक्रायनिमुनेः केतुयान-प्रदीपिका इत्यादयः अनेके ग्रन्थाः अपि विमानशास्त्रसम्बद्धाः एव ।

**पर्यावरणविज्ञानम्**

परितः आवृणोति यत् तद् एव पर्यावरणम् कथ्यते। अर्थात् प्रकृतिः एव पर्यावरणम् । पृथिवी, वायुः, जलम्, आकाशः, प्रकाशः, वनस्पतयः, पशुपक्षिणः, इत्यादयः पर्यावरणस्य प्रमुखानि अङ्गानि सन्ति।

**अधिकाङ्क्षानाम् अर्जनं कथं भवेत् ।**

- ➢ पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- ➢ पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- ➢ अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।